श्री श्यामला कवचं

श्री श्यामला कवचं

श्री देव्युवाच |
साधुसाधु महादेव कथयस्व महेश्वर |
येन संपद्विधानेन साधकानां जयप्रदं || 1 ||

विना जपं विना होमं विना मंत्रं विना नुतिं |
यस्य स्मरणमात्रेण साधको धरणीपतिः || 2 ||

श्री भैरव उवाच |
शृणु देवि प्रवक्ष्यामि मातंगीकवचं परं |
गोपनीयं प्रयत्नेन मौनेन जपमाचरेत् || 3 ||

मातंगीकवचं दिव्यं सर्वरक्षाकरं नृणां |
कवित्वं च महत्वं च गजावाजिसुतादयः || 4 ||

शुभदं सुखदं नित्यमणिमादिप्रदायकं |
ब्रह्मविष्णुमहेशानां तेषामाद्या महेश्वरी || 5 ||

श्लोकार्धं श्लोकमेकं वा यस्तु सम्यक्पठेन्नरः |
तस्य हस्ते सदैवास्ते राज्यलक्ष्मीर्न संशयः || 6 ||

साधकः श्यामलां ध्यायन् कमलासनसंस्थितः |
योनिमुद्रां करे बध्वा शक्तिध्यानपरायणः || 7 ||

कवचं तु पठेद्यस्तु तस्य स्युः सर्वसंपदः |
पुत्रपौत्रादिसंपत्तिरंते मुक्तिश्च शाश्वती || 8 ||

ब्रह्मरंध्रं सदा पायाच्छ्यामला मंत्रनायिका |
ललाटं रक्षतां नित्यं कदंबेशी सदा मम || 9 ||

भ्रुवौ पायच्च सुमुखी अव्यान्नेत्रे च वैणिकी |
वीणावती नासिकां च मुखं रक्षतु मंत्रिणी || 10 ||

संगीतयोगिनी दंतान् अव्यादोष्ठौ शुकप्रिया |
चुबुकं पातु मे श्यामा जिह्वां पायान्महेश्वरी || 11 ||

कर्णौ देवी स्तनौ काळी पातु कात्यायनी मुखं |
नीपप्रिया सदा रक्षेदुदरं मम सर्वदा || 12 ||

प्रियंकरी प्रियव्यापी नाभिं रक्षतु मुद्रिणी |
स्कंधौ रक्षतु शर्वाणी भुजौ मे पातु मोहिनी || 13 ||

कटिं पातु प्रधानेशी पातु पादौ च पुष्पिणी |
आपादमस्तकं श्यामा पूर्वे रक्षतु पुष्टिदा || 14 ||

उत्तरे त्रिपुरा रक्षेद्विद्या रक्षतु पश्चिमे |
विजया दक्षिणे पातु मेधा रक्षतु चानले || 15 ||

प्राज्ञा रक्षतु नैर्ऋत्यां वायव्यां शुभलक्षणा |
ईशान्यां रक्षताद्देवी मातंगी शुभकारिणी || 16 ||

ऊर्ध्वं पातु सदा देवी देवानां हितकारिणी |
पातळे पातु मां नित्या वासुकी विश्वरूपिणी || 17 ||

अकारादिक्षकारांतमातृकारूपधारिणी |
आपादमस्तकं पायादष्टमातृस्वरूपिणी || 18 ||

अवर्गसंभवा ब्राह्मी मुखं रक्षतु सर्वदा |
कवर्गस्था तु माहेशी पातु दक्षभुजं तथा || 19 ||

चवर्गस्था तु कौमारी पायान्मे वामकं भुजं |
दक्षपादं समाश्रित्य टवर्गं पातु वैष्णवी || 20 ||

तवर्गजन्मा वाराही पायान्मे वामपादकं |
तथा पवर्गजेंद्राणी पार्श्वादीन् पातु सर्वदा || 21 ||

यवर्गस्था तु चामुंडा हृद्दोर्मूले च मे तथा |
हृदादिपाणिपादांतजठराननसंज्ञिकं || 22 ||

चंडिका च शवर्गस्था रक्षतां मम सर्वदा |
विशुद्धं कंठमूलं तु रक्षतात्षोडशस्वराः || 23 ||

ककारादि ठकारांत द्वादशार्णं हृदंबुजं |
मणिपूरं डाधिफांत दशवर्णस्वरूपिणी || 24 ||

स्वाधिष्ठानं तु षट्पत्रं बादिलांतस्वरूपिणी |
वादिसांतस्वरूपाऽव्यान्मूलाधारं चतुर्दळं || 25 ||

हंक्षार्णमाज्ञा द्विदळं भ्रुवोर्मध्यं सदावतु |
अकारादिक्षकारांतमातृकाबीजरूपिणि || 26 ||

मातंगी मां सदा रक्षेदापादतलमस्तकं |
इमं मंत्रं समुद्धार्य धारयेद्वामके भुजे || 27 ||

कंठे वा धारयेद्यस्तु स वै देवो महेश्वरः |
तं दृष्ट्वा देवताः सर्वाः प्रणमंति सुदूरतः || 28 ||

तस्य तेजः प्रभावेन सम्यग्गंतुं न शक्यते |
इंद्रादीनां लभेत्सत्यं भूपतिर्वशगो भवेत् || 29 ||

वाक्सिद्धिर्जायते तस्य अणिमाद्यष्टसिद्धयः |
अज्ञात्वा कवचं देव्याः श्यामलां यो जपेन्नरः || 30 ||

तस्यावश्यं तु सा देवी योगिनी भक्षयेत्तनुं |
इह लोके सदा दुःखं अतो दुःखी भविष्यति || 31 ||

जन्मकोटि सदा मूको मंत्रसिद्धिर्न विद्यते |
गुरुपादौ नमस्कृत्य यथामंत्रं भवेत्सुधीः || 32 ||

तथा तु कवचं देव्याः सफलं गुरुसेवया |
इह लोके नृपो भूत्वा पठेन्मुक्तो भविष्यति || 33 ||

बोधयेत्परशिष्याय दुर्जनाय सुरेश्वरि |
निंदकाय कुशीलाय शक्तिहिंसापराय च || 34 ||

यो ददाति न सिध्येत मातंगीकवचं शुभं |
न देयं सर्वदा भद्रे प्राणैः कंठगतैरपि || 35 ||

गोप्याद्गोप्यतरं गोप्यं गुह्याद्गुह्यतमं महत् |
दद्याद्गुरुः सुशिष्याय गुरुभक्तिपराय च |
शिवे नष्टे गुरुस्त्राता गुरौ नष्टे न कश्चन || 36 ||

इति श्रीशक्तितंत्रमहार्णवे श्री श्यामला कवचं |